स्वादयते नरः। मतिभ्रंशो दरिद्रः स्यादन्ते न स्मरते हरिम्” राजनि०। भावप्र० दिनचर्य्यायामुक्तं यथा “धूमेनापोह्य हृद्यैर्वा कषायकटुतिक्तकैः। पूगकर्पूरकस्तूरीलवङ्गसुमनःफलैः। फलैः कटुकषायैर्वा मुखवैशद्यकारिभिः। ताम्बूलपत्रसहितैः सुगन्धैर्वा विचक्षणः। धूमेन अगुर्वादिधूमेन। अपोह्य कफं दूरीकृत्य कषायकटुतिक्तकैः फलैः कर्पूरकस्तूरीलवङ्गादिभिः पूगैः क्रमुकैः सुमनःफलैः जातीफलैः एलाहरीतक्यादिफलैः। रात्रौ सुप्तोत्थिते स्नाते भुक्ते वान्ते च सङ्गरे। सभायां विदुषां राज्ञां कुर्य्यात्ताम्बूलचर्व्वणम्। ताम्बूलमुक्तं तीक्ष्णोष्णं रोचनन्तु परं सरम्। तिक्तं क्षारोषणं कामरक्तपित्तकरं लघु। वश्यं श्लेष्मास्यदौर्गन्ध्यमलवातश्रमापहम्। मुखवैशद्यसौगन्ध्यकान्तिसौष्ठवकारकम्। हनुदन्तमलध्वंसि जिह्वेन्द्रियविशोधनम्। मुखप्रसेकशमनं गलामयविनाशनम्। नवं तदेव मधुरं कषायानुरसं गुरु। बलासजननं प्रायः पत्रशाकगुणं स्मृतम्। वङ्गदेशोद्भवं पर्णं परं कटुरसं सरम्। पाचनं पित्तजनकमुष्णं कफहरं स्मृतम्। पर्णं पुराणमकटु स्वल्पकन्तु पाण्डुरम्। विशेषाद्गुणवद्वेद्यमन्यद्धीनगुणं स्मृतम्।

खदिरः कफपित्तघ्नश्चूर्णं वातबलासहृत्। संयोगतस्त्रिदोषघ्नं सौमनस्यं करोति च। मुखवैशद्यसौगन्ध्यकान्तिसौष्ठवकारकम्। प्रभाते पूगमधिकं मध्याह्ने खदिरं तथा। निशासु चूर्णमधिकं ताम्बूलं भक्षयेत् सदा। आयुरग्रे यशो मूले लक्ष्मीर्मध्ये व्यवस्थिता। तस्मादग्रं तथा मूलं मध्यं पर्णस्य वर्जयेत्। पर्णमूले भवेद्व्याधिः पर्णाग्रे पापसम्भवः। जीर्णं पर्णं हरत्यायुः शिरा बुद्धिविनाशिनी। आद्यं विषोपमं पीतं द्वितीयं भेदि दुर्जरम्। तृतीयादनु पातव्यं सुधातुल्यं रसायनम्। ताम्बूलं नातिसेवेत न विरिक्तो बुभुक्षितः। देहदृक्केशदन्ताग्निश्रोत्रवर्णबलक्षयः। शोषः पित्तानिलास्रं स्यादतिताम्बूलचर्वणात्। विषमूर्च्छामदार्त्तानां क्षयिणां रक्तपित्तिनाम्।

“विना पर्णं मुखे दत्त्वा गुवाकं भक्षयेद्यदि। तावद्भवति चण्डालो यावद्गङ्गां न गच्छति” कर्म्मलोचनम्। “ताम्बूलं विधवास्त्रीणां यतीनां ब्रह्मचारिणाम्। तपस्विनाञ्च विप्रेन्द्र! गोमांससदृशं ध्रुवम्” इति ब्रह्मवै० पु० ख०। मार्कण्डेयः “भूयोऽप्याचम्य कर्त्तव्यं ततस्ताम्बूलभक्षणम्” वशिष्ठः “सुपूगञ्च सुपर्णञ्च सुचूर्णेन समन्वितम्। अदत्त्वा द्विजदेवेभ्यस्ताम्बूलं वर्जयेद्बुधः” “ताम्बूलद्वयमासनञ्च लभते यः कान्यकुब्जेश्वरात्” नैष० “ताम्बूलात्तं दशनमसकृद्दर्शयन्तीह चेटी” सा० द०। २पर्णलते स्त्री गौरा० ङीष्। “ताम्बूलीनां दलैस्तत्र रचिताः पानभूमयः” रघुः। [हेमच०।

**ताम्बूलकरङ्क** पु० ६त०। (पानडिपा) ताम्बूलपात्रभेदे

**ताम्बूलद** त्रि० ताम्बूलं ददाति दा—क। १राज्ञां ताम्बूलदाने अधिकृते दासभेदे २विप्रादिभ्यो ताम्बूलदातरि च ण्वुल्। ताम्बूलदायकोऽप्युभयत्र “जलताम्बूलकुसुमगन्धमाल्यादिदायकाः” कामन्दकीये।

**ताम्बूलपत्र** पु० ताम्बूलमिव पत्रमस्य। पिण्डालौ राजनि०। कर्म्म०। ताम्बूलीपत्रे न०।

**ताम्बूलपेटिका** स्त्री ६त०। ताम्बूलकरङ्के

**ताम्बूलराग** पु० ताम्बूलकृतो रागः शाक० त०। (पानेर बोल) १ताम्बूलजनिते रागे ताम्बूलस्य राग इव रागो रक्तता यस्य। २मसूरे हारा०।

**ताम्बूलवल्ली** स्त्री ताम्बूलाख्या वल्ली। (पान) नागवल्ल्याम् अमरः। स्वार्थे क अत्रैवार्थे।

**ताम्बूलिक** त्रि० ताम्बूलं तद्रचनं शिल्पमस्य। ताम्बूलरचनाधिकृते “आदिशब्दात् मालाकाररजकताम्बूलिकगान्धिकादयः” सा० द०।

**ताम्बूलिन्** त्रि० ताम्बूलं पण्यतयाऽस्त्यस्य इनि। १ताम्बूलविक्रेतरि (तामुलि)ख्याते २जातिभेदे पुंस्त्री स्त्रियां ङीप्।

**ताम्र** न० तम—रक् दीर्घः। १धातुभेदे (ताँमा) अमरः २कुष्ठभेदे कर्म्मविपाकः। ३रक्तवर्णे हेमच०। ४तद्वति त्रि०। धातुभेदस्योत्पत्तिकारणगुणादि भावप्र० उक्तं यथा “अथ ताम्रस्य उत्पत्तिर्नामलक्षणगुणाश्च। ‘शुक्रं यत् कार्त्तिकेयस्य पतितं धरणीतले। तस्मात्ताम्रं समुत्पन्नमिदमाहुः पुराविदः। ताम्रमौन्दुवरं शुल्वमुदुम्बरमपि स्मृतम्। रविप्रियं म्लेच्छमुखं सूर्य्यपर्य्यायनामकम्। जपाकुसुमसङ्काशं स्निग्धं मृदुघनक्षमम्। लोहनागोज्झितं ताम्रं मारणाय प्रशस्यते। कृष्णं रूक्षमतिस्तब्धं श्वेतञ्चापि घनासहम्। लोहनागयुतञ्चेति शुल्वं दुष्टं प्रकीर्त्तितम्। एको दोषो विषे ताम्रे त्वसम्यग्मारिते पुनः। दाहः स्वेदो रुचिर्मूर्च्छा क्लेदो रेको वमिर्भ्रमः” (रेकः विरेकः) तस्य मारणविधिस्तत्रोक्तो यथा